तर्कयन्ते प्रमितिविषयीक्रियन्ते इति तर्काः, द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाः सप्तपदार्थाः, तेषां प्रतिपाद्य-विषयाणां सम्यक्प्रकारेण ग्रहः ग्रहणं निश्चयात्मकं ज्ञानं यस्मादसौ तर्कसंग्रहः इति ।

## पदार्थनिरूपणम्

पदस्यार्थः पदार्थः इति व्युत्पत्त्या अभिधेयत्वं पदार्थ-सामान्यलक्षणम् । तत्र "द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः ।"

(i) **द्रव्यम्**—द्रव्यत्वं जातिमत्वम् । पृथ्व्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

(ii) **गुणः**—द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः । रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्काराश्चतुर्विंशति गुणाः ।


(iii) **कर्मम्**—एकद्रव्यमगुणम् संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम् । उत्क्षेपणापक्षेपणाऽकुंचनप्रसारणगमनानि पंचकर्माणि ।

(iv) **सामान्यम्**—नित्यमनेकानुगतं सामान्यम् । परमपरं चेति द्विविधं सामान्यम् । परं सत्ता । अपरं द्रव्यत्वादि ।

(v) **विशेषः**—नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः । विशेषास्त्वनन्ताः एव ।

(vi) **समवायः**—नित्यसम्बन्धो समवायः । अयुतसिद्ध-वृत्तिः । समवायस्त्वेक एव । ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थम् अपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनी, गुणगुणिनी, क्रिया-क्रियावन्ती, जातिव्यक्ती, विशेष-नित्यद्रव्ये चेति ।

(vii) **अभावः**—भावभिन्नः अभावः । प्रतियोगिज्ञानाधीन-विषयत्वम् । अभावश्चतुर्विधः,—प्रागभावः, प्रध्वंसाभावः, अन्योन्याभावः, अत्यन्ताभावश्च । तत्र अनादिःसान्तः प्रागभावः, उत्पत्तेः पूर्वं घटस्य । सादिरनन्तःप्रध्वंसः, उत्पत्त्यनन्तरं कार्यस्य । तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः, यथा घटः पटो नेति । त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताको अत्यन्ताभावः, यथा भूतले घटो नास्तीति ।




## कारणनिरूपणम्


कार्यनियतपूर्ववृत्तिः कारणम् । अत्र दण्डत्वादिवारणाय अन्यथासिद्धत्वावशेषण आवश्यकम् । अत एव अन्यथासिद्धशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम् । तत् त्रिविधम्,—समवाय्यसमवायिनिमित्तभेदात् ।

(i) **समवायिकारणम्**—यत्समवेतं कार्यमुत्पद्यते, तत्समवायिकारणम् । यथा तन्तवः पटस्य समवायिकारणम्, यतो हि तन्तुषु समवायसम्बन्धेन पटस्य उत्पत्तिः । अत्र ध्यातव्यमस्ति यत् येन प्रकारेण पटस्य तन्तुसम्बन्धः भवति, तेनैव प्रकारेण तुर्यादिसम्बन्धः नास्त्येव । अतः तन्तुष्वेव समवेतः पटो जायते, न तुर्यादिषु ।


अत्र द्विप्रकारको हि सम्बन्धः, संयोगः समवायश्च । तत्रायुतसिद्धयोः सम्बन्धः समवायः अन्ययोस्तु संयोगः एव । ययोर्द्वयोर्मध्ये एकमविनश्यद् अवस्थम् अपराश्रितमेवावतिष्ठते तावयुतसिद्धावित्यभिधीयते । यथा—अवयवावयविनौ, गुण-गुणिनौ । तन्तुपटाप्यवयवावयविनौ । अत एव तयोः सम्बन्धः समवायः, अयुतसिद्धवृत्तित्वात् । तुरीपटयोस्तु न समवायोऽयुतसिद्धत्वाभावात् । अत एव तन्तव एव पटस्य समवायिकारणम्, न तु तुर्यादिकम् ।

(ii) **असमवायिकारणम्**—यत् समवायिकारणं प्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणम् । यथा—तन्तुसंयोगः पटस्य असमवायिकारणम् । तन्तुसंयोगस्य पटसमवायिकारणेषु तन्तुषु गुणिषु समवेतत्वेन समवायिकारणप्रत्यासन्नत्वात् अन्यथासिद्धशून्यत्वे सति कार्यनियतपूर्वभावित्वात् पटरूपस्य तन्तुरूपमपि असमवायिकारणम् । कार्यैकार्थ-कारणैकार्थ-भेदेन असमवायिकारणं द्विविधम्—

**कार्यैकार्थप्रत्यासत्तिः**—पटादिकं प्रति तन्तुसंयोगादिकम् असमवायिकारणम् । तत्र कार्येण पटेन सह कारणस्य तन्तुसंयोगस्य एकस्मिन् तन्तौ प्रत्यासत्तिरस्ति ।




**कारणैकार्थप्रत्यासत्तिः**—पटरूपं प्रति तन्तुरूपमसमवायिकारणम् । तत्र स्वगतरूपादिकं प्रति समवायिकारणं पटः, तेन सह तन्तुरूपस्यैकस्मिन् तन्तौ प्रत्यासत्तिरस्ति ।




(iii) **निमित्तकारणम्**—समवाय्यसमवाय्युभयभिन्नं कारणं निमित्तकारणम् । यथा, तुरीवेमादिकं पटस्य निमित्तकारणम् ।

## प्रमाण-निरूपणम्

प्रमाकरणं प्रमाणम् । प्रमीयतेऽनेन इति करणार्थाभिधानो हि प्रमाणशब्दः । अत्र यथार्थानुभव एव 'प्रमा' इत्युच्यते । अस्याः प्रमायाः साधकतमं करणं प्रमाणमित्युच्यते । तच्चतुर्विधम्—प्रत्यक्षानुमानोपमानशब्दभेदाच्चतुर्विधम् ।

(i) **प्रत्यक्षप्रमाणम्**—साक्षात्कारिप्रमाकरणं प्रत्यक्षम् । साक्षात्कारिणी च प्रमा सा एव उच्यते या इन्द्रियजा । सा च द्विविधा, सविकल्पक-निर्विकल्पकभेदात् । तस्याः करणं त्रिविधम् । कदाचिद् इन्द्रियम्, कदाचिद् इन्द्रियार्थसन्निकर्षः, कदाचिज्ज्ञानम् च ।

निर्विकल्पकप्रमाकरणमिन्द्रियम् । अत्र आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन । इन्द्रियाणां वस्तुव्याप्तप्रकाशकारित्व नियमात् । ततोऽर्थसन्निकृष्टेन इन्द्रियेण निर्विकल्पकं नामजात्यादि-योजनाहीनं वस्तु-मात्रावगाहि किञ्चिद् इदम् इति ज्ञानं जन्यते । एतादृशस्य ज्ञानस्य इन्द्रियम् करणम् ।

निर्विकल्पकानन्तरं सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति विशेषण-विशेष्यावगाहि ज्ञानमुत्पद्यते, तदा इन्द्रियार्थसन्निकर्षः करणम् । अत्र निर्विकल्पकं ज्ञानमवान्तरव्यापारः, सविकल्पकं ज्ञानं फलम् ।

इन्द्रियार्थयोस्तु यः सन्निकर्षः साक्षात्कारिप्रमाहेतुः स षड्विधः एव । तद्यथा, संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषण-विशेष्यभावश्च ।

**संयोगः**—चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।

**संयुक्तसमवायः**—घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।

**संयुक्तसमवेतसमवायः**—रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेत-समवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात् ।

**समवायः**—श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद् गुण-गुणिनोश्च समवायात् ।

**समवेत-समवायः**—शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

**विशेषणविशेष्यभावः**—अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं, तत्करणमिन्द्रियम्, तस्मादिन्द्रियं प्रत्यक्षप्रमाणम् इति ।

(ii) **अनुमानप्रमाणम्**—अनुमितिकरणम् अनुमानम् । तत्र परामर्शजन्यं ज्ञानमनुमितिः । तत्रापि व्याप्तिविशिष्ट-पक्षधर्मता-ज्ञानम् परामर्शः । यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः । तज्जन्यं पर्वतोवह्निमानिनिति ज्ञानमनुमितिः । व्याप्तिविषये ज्ञातव्यमस्ति यत्—"यत्र यत्र धूमस्तत्र तत्राग्निरिति" साहचर्यनियमो व्याप्तिः ।

Scanned with CamScanner

अनुमानम् द्विविधम्,—स्वार्थं परार्थञ्च । तत्र स्वार्थं स्वार्थानुमितिहेतुः । तथाहि—स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसौ व्याप्तिं गृहीत्वा, पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति,—"यत्र यत्र धूमस्तत्र तत्राग्निरिति" तदनन्तरं वह्निव्याप्य धूमवानयं पर्वत इति ज्ञानम् उत्पद्यते । अयमेव लिंगपरामर्श इत्युच्यते । तस्मात् पर्वतो वह्निमान् इति ज्ञानमनुमितिः उत्पद्यते । एतत्स्वार्थानुमानम् ।

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम् । यथा—पर्वतो वह्निमान्, धूमवत्वात्, यो यो धूमवान् स स वह्निमान्, यथा महानसम्, तथा चायम्, तस्मात्तथेति ।

अत्र प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पंचावयवाः । पर्वतो वह्निमान् इति प्रतिज्ञा । धूमवत्वादिति हेतुः । यो यो धूमवान् स स वह्निमान् इति उदाहरणम् । तथा चायम् इत्युपनयः । तस्मात्तथेति निगमनम् ।

ज्ञातव्यमस्ति यत् स्वार्थानुमिति-परार्थानुमित्योर्लिंगपरामर्श एव करणम् । तस्मात् लिंगपरामर्शोऽनुमानम् ।

(iii) **उपमानप्रमाणम्**—उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितिः, तत्करणं सादृश्यज्ञानम् । तथाहि—कश्चिद् गवयपदार्थम् अजानन्कुतश्चिदारण्यक-पुरुषाद् 'गो-सदृशो गवयः' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गो-सदृशं पिण्डं पश्यति, तदनन्तरमसौ गवयशब्दवाच्यः इत्युपमितिः उत्पद्यते ।

(iv) **शब्दप्रमाणम्**—आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा, गाम् आनय इति । शक्तं पदम् । अस्मात् पदादयमर्थो बोद्धव्यः इतीश्वरसंकेतः शक्तिः । अथवा अर्थस्मृत्यनुकूलः पदपदार्थसम्बन्धः शक्तिः ।

अत्र आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः । पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकांक्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः । तथा च आकांक्षाविरहितं वाक्यम् अप्रमाणम् । यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम् आकांक्षाविरहात् । वह्निना सिंचति इति न प्रमाणम्, योग्यता-विरहात् । प्रहरे-प्रहरे असहोच्चारितानि गामानय इत्यादिपदानि न प्रमाणम् सान्निध्याभावात् ।

अत्र वाक्यं द्विविधं,—वैदिकं लौकिकम् च । वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । इत्थं वाक्यार्थज्ञानमेव शाब्दज्ञानम्, तत्करणं तु शब्दः ॥

## प्रसंगप्राप्त-दर्शनग्रन्थानां परिचय-सामान्यम्

Scanned with CamScanner